# आदर्शप्रश्नपत्रम्

**प्रथमः भागः 'अ'**

**प्रथमखण्डः-संस्कृतभाषादक्षता**

**सर्वे प्रश्नाः एकाङ्कपरिमिताः।**

1. एतद् दीर्घसन्धेः उदाहरणम्-

(अ) सुखार्तः (ब) सदैव

(स) वधूत्सवः (द) यमुनोर्मिः

2. 'पिता' इति पदं 'पितृ' शब्दस्य-

(अ) पंचमी-एकवचनम् (ब) षष्ठी-एकवचनम्

(स) प्रथमा-एकवचनम् (द) सम्बोधन-एकवचनम्

3. रेखाङ्क्तिपदस्य शुद्धपदपरिचयं चिनुत-

<u>त्रिंशतः</u> बालकानां गृहे सर्वे संस्कृतं वदन्ति। अत्रत्रिंशत् पदस्य

(अ) षष्ठी-एकवचनम् (ब) षष्ठीबहुवचनम्

(स) पंचमी-एकवचनम् (द) द्वितीयाबहुवचनम्

4. रेखाङ्क्तिपदस्य शुद्धं पदपरिचयं चिनुत-

<u>भवतः</u> नाम किम्?

(अ) पञ्चमी-एकवचनम् (ब)द्वितीयाबहुवचनम्

(द) षष्ठीबहुवचनम्

5. चिन्त्+ तुमुन्=?

(अ) चिन्तितम् (ब) चिन्तितुम्

(द) चिन्तयितुमुन्

6. कस्मिन् पदे तद्धितप्रत्ययः न प्रयुक्तः?

(अ) गांगेयः (ब) दैनिकः

(द) सर्वत्र

7. कस्मिन् समस्तपदे बहुव्रीहिसमासः नास्ति?

(अ) घनश्यामः जलदः (ब)आरूढवानरः वृक्षः

(स) सपुत्रः पिता (द) यशोधनः राजा

8. कस्मिन् रेखाङ्किते पदे अव्ययीभावसमासः अस्ति?

(अ) <u>सविघ्नं</u> पुरुषम् (ब)<u>प्रपर्णः</u> वृक्षः

(स) <u>द्वित्राः</u> जनाः (द)<u>सादरं</u> नमति

9. बालिके पादपान् रोपयतः इति वाक्यं कर्मवाच्ये कथं भवति?

(अ) बालिकाभ्यां पादपाः रोप्यन्ते। (ब)बालिके पादपाः रोप्यन्ते।

(स) बालिकाभिः पादपाः रोप्यन्ते। (द)बालिकाभ्यां पादपाः रोप्यते।

10. किं.................पुस्तकानि न रोचन्ते?

(अ) युष्माभिः (ब)युष्माकम्

(स) युष्मभ्यम् (द)युष्मान्

## द्वितीयखण्डः
## सामान्यज्ञानपरीक्षणम् मानसिक-योग्यता च

1. एषु कः गायकः?

   (अ) बिरजू महाराजः (ब) बिस्मिल्ला खान

   (स) पं0 रविशंकरः (द) भीमसेनः जोशी

2. शकसंवत्सरस्य प्रारम्भः कस्माद् ईसवीय-वर्षात् अभवत्........?

   (अ) 78 ई0 (ब) 70 ई0

   (स) 56 ई0 (द) 155ई0

3. मूलभूत-अधिकारान् कः निरोद्धुम् सक्षमः?

   (अ) उच्चतमः न्यायालयः (ब) राष्ट्रपतिः

   (स) प्रधानमंत्री (द) लोकसभा

4. शिक्षासम्बन्धिनी संयुक्तराष्ट्रसंघस्य संस्था का?

   (अ) यूनीसेफ (ब) यूनेस्को

   (स) आई0एल0एम0 (द) सी0एस0आई0आर0

5. गोआ प्रदेशस्य भाषा अस्ति

   (अ) पुर्तगाली (ब) कोंकणी

   (स) वाशिंगटन (द) न्यू जर्सी

6. अग्रिमः वर्णः कः? ख फ छ ठ-?

   (अ) च (ब) थ

   (स) ट (द) क

7. भिन्नं किम्

   (अ) चर्म-उपानहौ (ब) काष्ठम्-आसन्दिका

   (स) स्वर्णम्-आभूषणम् (द) भाण्डम्-मृत्तिका

8. भारतम् हिमालयः ::हिमालयः :.............?............

   (अ) गौरीशङ्करशिखरम् (ब) कुम्भकारः

   (स) गुहाः (द) प्रपाताः

9. भिन्नः कः?

   (अ) चित्रकारः (ब) कुम्भकारः

   (स) पत्रकारः (द) वर्गाकारः

10. अग्रिमसंख्या का? 8, 11, 15, 18, 22, 25, 29.........?.........

    (अ) 36 (ब) 35

    (स) 32 (द) 34

## तृतीयखण्डः
## शिक्षण-अभिरुचि-परीक्षणम्

1. प्रशिक्षणस्य उद्देश्यम् अस्ति-
   (अ) आजीविकोपलब्धिः (ब)शिक्षणकौशलविकासः
   (स) राष्ट्रसेवा (द)शिक्षायाः प्रोन्नतिः
2. कः शिक्षणसिद्धान्तः शुद्धः-
   (अ) सरलात् कठिनं प्रति (ब)अज्ञातात् ज्ञातं प्रति
   (स) सूक्ष्मात् स्थूलं प्रति (द)कठिनात् सरलं प्रति
3. शोभनः अध्यापकः छात्रान्-
   (अ) पूर्वं परिश्रमं कृत्वा पाठयति । (ब) उच्चस्वरेण अध्यापयति।
   (स) छात्रान् स्वयं पठितुं निर्दिशति। (द)योग्यछात्राणां साहाय्येन पाठयति।
4. उच्चस्तरीयबालकेभ्यः आवश्यकम्
   (अ) पृथक् शिक्षणम् (ब)विशिष्टसृजनात्मककार्यम्
   (स) विशिष्टव्याख्यानम् (द)नवीनज्ञानम्
5. काव्यशिक्षणस्य उद्देश्यं भवति
   (अ) चतुर्वर्गफलप्राप्तिः (ब)शब्दभण्डारस्य अभिवृद्धिः
   (स) काव्यरचनाकौशलविकासः (द)व्यवहार-चातुर्य-विकासः
6. उपनिषत्कालिकशिक्षायाः उद्देश्यम् आसीत्
   (अ) इतिहासज्ञानम् (ब)वेदज्ञानम्
   (स) व्यवहारज्ञानम् (द)ब्रह्मज्ञानम्
7. वर्तमानराष्ट्रियशिक्षानीतिः अस्मिन् ख्रीष्टाब्दे पुनरीक्षिता-
   (अ) 1998 (ब)1992
   (स) 1977 (द)1967
8. ग्रामीणच्छात्राणां विशिष्टशिक्षासम्पादनाय स्थापिताः विद्यालयाः सन्ति-
   (अ) सर्वोदयविद्यालयाः (ब)केन्द्रीयविद्यालयाः
   (स) ग्रामोदयविद्यालयाः (द)नवोदयविद्यालयाः
9. 'ब्लैकबोर्ड' आप्रेशन' इत्यस्य अभिप्रायः-
   (अ) विद्यालयेषु श्यामपट्टानाम् उपलब्धिः (ब)पुरातानां श्यामपट्टानां तक्षणम्
   (स) श्यामपट्टेषु कृष्णमसीलेपनम् (द)विद्यालये न्यूनतमशिक्षणसामग्रीप्रदानम्
10. अयं परामनोविज्ञानस्य जनकः
   (अ) सिंग्मंड फ्राएड (ब)एडलर
   (स) युंग (द)टर्मन

## चतुर्थः खण्डः
## संस्कृतवाङ्मयम्

1. आसु का अथर्ववेदस्य शाखा–
   (अ) पिप्पलादिशाखा (ब)तैत्तिरीयशाखा
   (स) माध्यन्दिनशाखा (द)काण्वशाखा
2. न्यायदर्शनस्य प्रवर्तकः
   (अ) मुरारिः (ब)गौतम
   (स) कपिल (द)भरतमुनिः
3. महाभारतस्य अङ्गभूतोऽयं ग्रन्थः–
   (अ) नाटड्शास्त्रम् (ब) सिद्धान्तलेशसंग्रहः
   (स) भगवद्गीता (द)सांख्यतत्त्वकौमुदी
4. पुराणनि कति?
   (अ) 10 (ब)12
   (स) 18 (द)20
5. शाकुन्तले दुष्यन्तस्य सारथिः–
   (अ) मातलिः (ब)सूतः
   (स) माघः (द)अरुणः
6. सौन्दरानन्दकाव्यस्य रचयिता
   (अ) कालिदासः (ब)अश्वघोषः
   (स) मुरारिः (द)राजशेखरः
7. शिवराजविजयस्य रचयिता
   (अ) बाण (ब)गुणाढ्यः
   (स) अम्बिकादत्त व्यासः (द)विजयसूरी
8. संकल्पसूर्योदयः–
   (अ) गद्यकाव्यम् (ब)चम्पूकाव्यम्
   (स) नाटकम् (द)गीतिकाव्यम्
9. एषु एका आदिशंकरस्य रचना
   (अ) ब्रह्मसूत्रम् (ब)न्यायरक्षामणिः
   (स) उपदेशसाहस्री (द)योगवासिष्ठः
10. नलचम्पूकाव्यस्य रचयिता–
   (अ) त्रिविक्रमभट्ट (ब)भोजदेवः
   (स) वेंकटाधवरिः (द)श्रीहर्षः

# द्वितीयभागः-ब

**संस्कृतभाषातत्त्वदक्षता** **40 अङ्का**

**टिप्पणी ( उत्तराणि उत्तरपत्रिकायाम् एव लेख्यानि )**

**( अ ) यथानिर्देशं कुरुत-** **10 अङ्का**

1. क. एकवचने परिवर्तनं कुरुत-

   एतानि एव तपोवनानि।

   ख. अत्र किं सम्बोधनपदम्?

   मत्पुत्राः किमकुर्वत संजय?

   ग. लङ्लकारे परिवर्तयत-

   राजा कथं धेनुं परिचरति?

   घ. आसीद्राजा नलो नाम। अत्र कानि पदानि प्रथमान्तानि?

   ङ "एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः" अत्र किं किम् अव्ययपदम्?

( ब1 ) **अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-** **10 अङ्का**

यद्यपि बुद्धिबलं सर्वबलप्रधानम् इति भणितिः सुप्रसिद्धा तथापि शरीरबलमपि अपेक्ष्यते। बलवति शरीरे एव मनो बलवत् बुद्धिश्च बलवती सम्भवति। बलवान् पुरुषो देशो वा सर्वैः समाद्रियते, निर्बलः सदैव परिभूयते। संसारोऽयं निर्बलानां कृते नास्ति।

प्रश्नाः

1. का लोकोक्तिः सुप्रसिद्धा?
2. बलवति शरीरे बुद्धिः कीदृशी भवति?
3. 'परिभूयते' इत्यस्य कः विपरीतार्थकः अत्र प्रयुक्तः?
4. संसारः केषां कृते नास्ति?
5. 'सम्भवति' इति क्रियापदस्य कर्तृपदं किम्?

( ब2 ) **पद्यं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **10 अङ्का**

यदा किञ्चिज्ज्ञोहं द्विप इव मदान्धः समभवम्,
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः
यदा किञ्चित्किञ्चिद्बुधजनसकाशादधिगतम्
तदा मूर्खोस्मीति ज्वर इव मदो मे व्यपगतः।

**प्रश्नाः**

1. अहं कदा मदान्धः आसम्?
2. 'सर्वं जानाति इति अर्थे किं पदं प्रयुक्तम्?
3. केषां सकाशात् ज्ञानं प्राप्तम्?
4. मम मदः कथमिव व्यपगतः?
5. 'मदः' पदस्य किं विशेषणम् अत्र प्रयुक्तम्?

( स ) **कमपि एकं विषयम् अधिकृत्य पञ्चाशत् शब्दपरिमितम् अनुच्छेदं लिखत** **10 अङ्का**

क. शरत्पूर्णिमायां नभसः वर्णनम्।

ख. बसस्थानके प्रतीक्षारतस्य जनस्य मनोदशावर्णनम्।

ग. शुष्कवृक्षस्य आत्मकथा।

घ. भवतः/भवत्याः परीक्षाकक्षस्य वर्णनम्।